पुलस्त्य उवाच ।
"श्रूयतां संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ।
सर्व्वदा वरदा दुर्गा सेयं कात्यायनी मुने ! ॥
सुरासुरवरौ रौद्रौ जगत्क्षोभकरावुभौ ।
रम्भश्चैव करम्भश्च दानवौ सुमहाबलौ ॥
तावपुत्रौ च देवर्षे ! पुत्त्रार्थं तेपतुस्तपः ।
बहुवर्षगणान् दैत्यौ स्थितौ पञ्चनदे जले ॥
तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमी ।
करम्भश्चैव रम्भश्च यक्षं मालवटं प्रति ॥
एकं निमग्नं सलिले ग्राहरूपेण वासवः ।
चरणाभ्यां समादाय निजघान यथेच्छया ॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः ।
वह्नौ स्वशीर्षं संछिद्य होतुमैच्छन्महाबलः ।
ततः प्रगृह्य केशेषु खड्गञ्च रविसंप्रभम् ।
छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः ॥
उत्तिष्ठासुर ! मा मैवं नाशयात्मानमात्मना ।
दुस्तरा परवध्यापि स्ववध्याप्यतिदुस्तरा ॥
यच्च प्रार्थयसे वीर ! तद्ददामि यथेप्सितम् ।
मा म्रियस्व मृतस्येह नष्टा भवति वै कथा ॥
ततोऽब्रवीद्वचो रम्भो वरं चेन्मे ददासि हि ।
त्रैलोक्यविजयी पुत्त्रः स्यान्मे त्वत्तेजसाधिकः ॥
अजेयो दैवतैः सर्व्वैः पुंभिर्दैत्यैश्च पावक ! ।
महाबलो वायुरिव कामरूपी कृतास्त्रवित् ॥
तं प्रोवाच कविर्ब्रह्मन् ! बाढ़मेवं भविष्यति ।
यस्यां चित्तं समालम्बि करिष्यसि ततोऽसुर ! ॥
इत्येवमुक्तो देवेन वह्निना दानवो ययौ ।
यक्षं सुनिवटं यायं यक्षैश्च परिवारितम् ॥
तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः ।
गजाश्च महिषाश्चाश्वा गावोऽजाविपरिप्लुताः ॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः ।
महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन ! ॥
समागच्छच्च दैत्येन्द्रं कामयन्ती तरस्विनी ।
स चाभिगमनं चक्रे भवितव्यप्रचोदितः ॥
तस्यां समभवद्गर्भस्तां प्रगृह्याथ दानवः ।
पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥
दृष्टश्च दानवैः सर्व्वैः परित्यक्तश्च बन्धुभिः ।
अकार्य्यकारकत्वेवं भूयो मालवटं गतः ॥
सापि तेनैव पतिना महिषी चारुदर्शना ।
समं जगाम तत्पुण्यं यक्षमण्डलमुत्तमम् ॥
ततस्तु वसतस्तस्य श्यामा सा सुषुवे सुते ! ।
अजीजनत् सुतं शुभ्रं महिषं कामरूपिणम् ॥"
इति वामनपुराणे १७ अध्यायः ॥ * ॥
अन्यच्च । धरण्युवाच ।
"या सा माया शरीरात्तु ब्रह्मणोऽव्यक्तजन्मनः ।
गायत्त्र्यष्टभुजा भूत्वा वेत्रासुरमयोधयत् ॥
सैव नन्दाभवद्देवी देवकार्य्यचिकीर्षया ।
महिषाख्यासुरवधं कुर्व्वती ब्रह्मणेरिता ॥
वैष्णव्या च हतो देव ! कथमेतद्धि संशयः ॥
वराह उवाच ।
इयं जगद्धिता देवी गङ्गा शङ्करसुप्रिया ।
कश्चित् किञ्चित् भवेद्दृष्टं सपदं वेद सर्व्ववित् ।
स्वायम्भुवे हतो दैत्यो वैष्णव्या मन्दरे गिरौ ।
महिषाख्योऽपरः पश्चात् स वै चैत्रासुरः पुनः ।
नन्दया निहतो विन्ध्ये महाबलपराक्रमः ॥
अथवा ज्ञानशक्तिः सा महिषोऽज्ञान-
मूर्त्तिमान् ।
अज्ञानं ज्ञानसाध्यन्तु भवतीति न संशयः ॥
मूर्त्तिपक्षे चेतिहासममूर्त्ते चैकवद्धृदि ।
ध्यायते वेदवाक्यैस्तु इह या वेदवादिभिः ॥"
इति वराहपुराणम् ॥

महिषासुरसम्भवः, पुं, ( महिषासुरात् तन्मेदसः सम्भवतीति । सम् + भू + अच् । ) . भूमिज-गुग्गुलुः । इति राजनिर्घण्टः ।

महिषासुरहन्त्री, स्त्री, ( हन् + तृच् + ङीप् । महिषासुरस्य हन्त्री । )दुर्गा । यथा,—
"महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने ।"
इति प्रतिष्ठातत्त्वधृतपद्मपुराणवचनम् ॥

महिषाक्षः, पुं, ( महिषस्य अक्षीवेति । "अक्ष्णोऽदर्शनात् ।"५।४।७६। इति समासान्तोऽच् । ) गुग्गुलुः । इति राजनिर्घण्टः ॥ ( तथास्य पर्य्यायः ।
"जटायुः कालनिर्य्यासः कौशिको गुग्गुलुः पुरः ।
देवधूपः सर्व्वसहो महिषाक्षः पलङ्कषा ॥"
इति वैद्यकरत्नमालायाम् ॥
अस्य व्यवहारविषयो यथा,—
"महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ॥
कदाचिन्महिषाक्षश्च यतः केचिन्नृणामपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

महिषाक्षकः, पुं, ( महिषाक्ष । स्वार्थे कन् । ) गुग्गुलुः । इति राजनिर्घण्टः ॥

महिषी, स्त्री, ( महिषस्य कृताभिषिक्तस्य नृपस्य पत्नी । "पुंयोगादाख्यायाम् ।" ४।१।४८। इति ङीष् । ) कृताभिषेका राजपत्नी । इत्य-मरः । २ । ६ । ५ ॥ ( यथा, रघौ । २ । २५ ।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")
सैरिन्ध्री । औषधिभेदः । इति मेदिनी । षि,३३॥
महिषयोषित् । तत्पर्य्यायः । मन्दगमना २ महाक्षीरा ३ पयस्विनी ४ तुलापकान्ता ५ कलुषा ६ तुरङ्गद्विषणी ७ ॥ अस्याः क्षीर-गुणाः । मधुरत्वम् । विपाके शीतलत्वम् । गुरुत्वम् । बलपुष्टिप्रदत्वम् । वृष्यत्वम् । पित्तदाहास्रनाशित्वञ्च ।
"माहिषं मधुरं गव्यात् स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम् ॥
तस्या दधिगुणाः । मधुरत्वम् । स्निग्धत्वम् । श्लेष्मकारित्वम् । रक्तपित्तनाशित्वम् । बलास-वर्द्धनत्वम् । बल्यत्वम् । श्रमघ्नत्वम् । शोधन-त्वञ्च ।
"माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वस्रदूषणम् ॥*॥"
अस्या नवनीतगुणाः । कषायत्वम् । मधुर-रसत्वम् । शीतत्वम् । वृष्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । सुन्दरत्वञ्च ।
"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"
अस्या घृतगुणाः । उत्तमत्वम् । धृतिकारत्वम् । सुखदत्वम् । कान्तिकृत्त्वम् । वातश्लेष्मनाशित्वम् । बलकारत्वम् । वर्षप्रदाने क्षमत्वम् । दुर्नाम-ग्रहणीविकारशमनत्वम् । मन्दानलोद्दीप-नत्वम् । चक्षुष्यत्वम् । गव्यतो न श्रेष्ठत्वम् । हृद्यत्वम् । मनोहारित्वञ्च ।
"माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते ॥"
इति भावप्रकाशः ॥ * ॥
अस्या मूत्रगुणाः । आनाहशोफगुल्मदोष-नाशित्वम् । कटुत्वम् । उष्णत्वम् । कुष्ठ-कण्डूतिशूलोदररोगनाशित्वञ्च । इति राज-निर्घण्टः ॥ ( अस्या दुग्धगुणाश्च यथा, चरके सूत्रस्थाने २७ अध्याये ।
"महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहान्न्यूनमनिद्राय हितमत्यग्नये च तत् ॥"

महिषीप्रिया, स्त्री, ( महिषीणां प्रिया । ) मूली-तृणम् । इति राजनिर्घण्टः ॥

मही, स्त्री, ( मह्यते इति । मह् + अच् । मह + "गौरादिभ्यश्च । ४ । १ । ४१ । इति ङीष् । यद्वा, महि । कृदिकारादिति ङीष् । ) पृथिवी । इत्यमरः । २ । १ । ३ । ( यथा विष्णुपुराणे । १ । ४ । २६ ।
"उत्तिष्ठतस्तस्य जलार्द्रकुक्षे
र्महावराहस्य महीं विधार्य्य ।
विधुन्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयो स्तुवन्ति ॥")
नदीविशेषः । सा च मालवदेशे वर्त्तते । इति मेदिनी । हे, । ७ ॥ तज्जलगुणाः ।
"महीजलन्तु सुस्वादु बल्यं पित्तहरं गुरु ।"
इति राजनिर्घण्टः ॥
गौः । इति जटाधरः ॥ हिलमोचिका । इति त्रिकाण्डशेषः ॥ ( लोकः । यथा, ऋग्वेदे । १ । ५६ । २ ।
"तिस्रो महीरुपरास्तस्थुः ॥"
"महीः लोकाः ।" इति तद्भाष्ये सायनः ॥ )

महीक्षित्, पुं, ( मह्यां क्षयते ईष्टे । क्षि + क्विप् । तुक् च । ) राजा । इत्यमरः । २ । ८ । १ ॥ (यथा, महाभारते । ७ । ४४ । २४ ॥
"रथचर्य्यास्त्रमायाभिर्मोहयित्वा परन्तपः ।
बिभेद शतधा राजन् ! शरीराणि महीक्षिताम् ॥" )

महीजं, क्ली, ( मह्यां जायते इति । जन + डः । ) आर्द्रकम् । इति राजनिर्घण्टः ॥ भूमि-जाते । त्रि ॥ (यथा, महाभारते ।६।८७।३-४ ।
"आरट्टानां महीजानां सिन्धुजानाञ्च सर्व्वशः ।